.. shAnti mantra ..

# ॥ शान्ति मन्त्राः ॥

१. पञ्च शान्ति मन्त्राः

ॐ शं नो॑ मि॒त्रः शं वरु॑णः । शं नो॑ भवत्वर्य॒मा । शं न॒ इन्द्रो॒ बृह॒स्पतिः॑ ।
शं नो॒ विष्णु॑रुरुक्र॒मः । नमो॒ ब्रह्म॑णे । नम॑स्ते वायो । त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि ।
त्वामे॒व प्र॒त्यक्षं॒ ब्रह्म॑ वदिष्यामि । ऋ॒तं व॑दिष्यामि । स॒त्यं व॑दिष्यामि ।
तन्माम॑वतु । तत्व॒क्तार॑मवतु । अव॑तु॒ माम् । अव॑तु व॒क्तार॑म् ॥
ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥ १॥

The following verse occurs at the end of प्रथमा शीक्षावल्ली of तैत्तिरीयोपनिषत्
as उत्तरशान्तिपाठः and it is always chanted following the above verse.
Please note: (a) there is no OM at the beginning (b) it is the same as the previous verse,
upto त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि and the remainder is in a different tense

शं नो॑ मि॒त्रः शं वरु॑णः । शं नो॑ भवत्वर्य॒मा । शं न॒ इन्द्रो॒ बृह॒स्पतिः॑ ।
शं नो॒ विष्णु॑रुरुक्र॒मः । नमो॒ ब्रह्म॑णे । नम॑स्ते वायो । त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि ।
त्वामे॒व प्र॒त्यक्षं॒ ब्रह्मावा॑दिषम् । ऋ॒तम॑वादिषम् । स॒त्यम॑वादिषम् । तन्मामा॑वीत् ।
तत्व॒क्तार॑मावीत् । आवी॒न्माम् । आवी॑द्व॒क्तार॑म् ॥
ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥ २॥

ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै । ते॒ज॒स्वि ना॒वधी॑तमस्तु
मा वि॑द्विषा॒वहै॑ ॥
ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥ ३॥

ॐ नमो॑ वा॒चे या चोदि॑ता या चानु॑दिता॒ तस्यै॑ वा॒चे नमो॒ नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒
नम॒ ऋषि॑भ्यो॒ मन्त्र॒कृद्भ्यो॒ मन्त्र॑पतिभ्यो॒ मामामृष॑यो मन्त्र॒कृतो॑ मन्त्र॒पत॑यः॒
परा॑दु॒र्माहमृ॒षी॑न्मन्त्र॒कृतो॑ मन्त्र॒पती॒न्परा॑दां वैश्वदे॒वीं वा॒च॑मु॒द्यासग्म्
शि॒वाम॒द॑स्तां॒ जुष्टा॑ दे॒वेभ्यः॒ शर्म॑ मे॒ द्यौः शर्म॑ पृ॒थि॒वी शर्म॒ विश्व॑मि॒दं
जग॑त् । शर्म॑ च॒न्द्रश्च॒ सूर्य॑श्च॒ शर्म॑ ब्रह्मप्रजाप॒ती । भू॒तं व॑दिष्ये भुव॑नं
व॑दिष्ये तेजो॑ वदिष्ये यशो॑ वदिष्ये तपो॑ वदिष्ये ब्रह्म॑ वदिष्ये स॒त्यं व॑दिष्ये
तस्मा॑ अ॒हमि॒दमु॒प॑स्त॒र॑णमु॒प॑स्तृण उ॒प॒स्त॒र॑णं मे प्र॒जायै॑ पशू॒नां भू॑यादु॒प॒स्त॒र॑णम॒हं
प्र॒जायै॑ पशू॒नां भू॑यासं॒ प्राणा॑पानौ मृ॒त्योर्मा॑ पातं॒ प्राणा॑पानौ॒ मा मा॑ हासिष्टं॒ मधु॑
मनिष्ये मधु॑ जनिष्ये मधु॑ वक्ष्यामि॒ मधु॑ वदिष्यामि॒ मधु॑मतीं दे॒वेभ्यो॒ वाच॑मु॒द्यासग्म्
शु॒श्रू॒षेण्या॑ मनु॒ष्ये॑भ्य॒स्तं मा॑ दे॒वा अ॑वन्तु शो॒भायै॑ पि॒तरोऽनु॑मदन्तु ।



From http://sanskritdocuments.org

ॐ शान्तिः शान्तिः शान्तिः ॥ ४॥

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवीं स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे॥
ॐ शान्तिः शान्तिः शान्तिः ॥ ५॥

2. Other shAnti mantrAH that are associated commonly with upanishad

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवागम् सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु॥
ॐ शान्तिः शान्तिः शान्तिः ॥ ६॥

ॐ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृताथ्सम्बभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरिविश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय॥
ॐ शान्तिः शान्तिः शान्तिः ॥ ७॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।
ॐ शान्तिः शान्तिः शान्तिः ॥ ८॥
Note the difference in the accents of the "shAntiH shAntiH shAntiH" compared to the previous svasti vAchakam

ॐ असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्माऽमृतं गमय॥
ॐ शान्तिः शान्तिः शान्तिः ॥ ९॥

Encoded and proofread by
Venki Subramanian vs.sanskrit@gmail.com
Reference: "MantrapuShpam" published by Ramakrishna Math, Khar, Mumbai

---

Please send corrections to sanskrit@cheerful.com
Last updated July 20, 2014
From http://sanskritdocuments.org .
The text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or commercial purpose without permission.



From http://sanskritdocuments.org